वंदिताशॆषवंद्यॊरुवृंदारकं चंदनाचर्चितॊ दारपीनांसकम ।
इंदिराचंचलापांगनीराजितं मंदरॊद्धारि वृत्तॊद्भुजाभॊगिनं ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ १ ॥
सृष्टिसंहारलीलाविलासाततं पुष्टषाड्गुण्य सद्विग्रहॊल्लासिनम ।
दुष्ट निष्यॆषसंहारकर्मॊद्यतं हृष्टपुष्टानुतिशिष्ट प्रजासंश्रयं ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ २ ॥
उन्नतप्रार्थिताशॆषसंसाधकं सन्नतालौकिका नंदद श्रीपदम ।
भिन्नकर्माशयप्राणिसंप्रॆरकंतन्नकिंनॆति विद्वत्सु मिमांसितं ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ ३ ॥
विप्रमुख्यैः सदावॆदवादॊन्मुखैः सुप्रतापैः क्षीतिशॆश्वरैश्चार्चितं ।
अप्रतर्क्यॊरुसंविद्गुणं निर्मलं सप्रकाशाजरानंद रूपंपरं ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ ४ ॥
अत्ययॊ यस्यकॆनापिनक्वापिहिप्रत्यतॊ यद्गुणॊषूत्तमानांपरः ।
सत्यसंकल्प ऎकॊ वरॊण्यॊ वशी मत्यनूनैः सदा वॆदवादॊदितः ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ ५ ॥
पश्यतां दुःखसंताननिर्मूलनं दृश्यतां दृश्यतामित्य जॆशाचि(र्थि)तम ।
नश्यतां दूरगं सर्वदाप्यात्मगं पश्यतां स्वॆच्चया सज्जनॆष्वागतं ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ ६ ॥
अग्रजं यः ससर्जाजमग्र्याकृतिं विग्रहॊयस्य सर्वॆगुणा ऎव हि ।
उग्र आद्यॊऽपि यस्यात्मजाग्र्यात्मजः सद्गृहीतः सदायः परंदैवतम ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ ७ ॥

अच्युतॊ यॊ गुणैर्नित्यमॆवाखिलैः प्रच्युतॊऽशॆष दॊषैः सदापूर्तित ।
उच्यतॆ सववॆदॊरु वादैरजः स्वजितॊ(च्यतॆ) ब्रह्मरुद्रेंद्र पूवैस्सदा ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ ८ ॥
धार्यतॆ यॆनविश्वं सदाजादिकं वार्यतॆशॆषदुःखं निजध्यायिनां ।
पार्यतॆ सर्वमन्यैर्नयत्पार्यतॆ कार्यतॆ चाखिलं सर्वभूतैः सदा ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ ९ ॥
सवपापानि यत्संस्मृतॆः संक्षयसर्वदा यांतिभक्त्याविशुद्धात्मनां ।
शर्वगुर्वादिगीर्वाण संस्थानदः कुर्वतॆ कर्म यत्प्रीतये सज्जनाः ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ १० ॥
अक्षयं कर्मयस्मिन परॆस्वर्पितंऽप्रक्ष यं यांति दुःखानिःयन्नामत ।
अक्षरॊयॊऽजरः सर्वदैवामृतः कुक्षिगं यस्य विश्वं सदाजादकम ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ ११ ॥
नंदितीर्थॊरुसन्नामिनॊ नंदिनः संदधानाः सदानंददॆवॊ मतिम ।
मंदहासारुणापांग दत्तॊन्नतिं न(वं)दिता शॆषदॆवादि वृंदं सदा ।
प्रीणयामॊ वासुदॆवं दॆवतामंडला खंडमंडनं प्रीणयामॊ वासुदॆवं ॥ १२ ॥
इति श्रीमदानंदतीर्थभगवत्पादाचार्य विरचितं
द्वादशस्तॊत्रॆषु अष्टमस्तॊत्रं संपूर्णं